द्विपञ्चाशद्वाराचार्या विरचिता भजनरत्नावली

योगानन्तसुखास्तथानहरिर्भावस्तथागालवो,
ह्यानन्देतिपदान्तकाः सुरसुरश्शिष्याश्चसप्ताभवन् ।
पीपासेनधनारमाश्च कबिरःपद्मावती चापरे,
सार्दैर्द्वादशशिष्यकैस्तुगुरवः कुर्वन्तुनो मङ्गलम् ॥ १॥

रामानन्दो निम्बादित्योविष्णुस्वामीश्रीमाधवः ।
चत्वारोभगवद्भक्ताजगतीधर्मस्थापकाः ॥ २॥

एतेषामनुयायिनोद्विपञ्चाशद्विजज्ञिरे ।
अनन्तश्चा लखरामौ सुखानन्दोनरहरिः ॥ ३॥

कीलाग्रौसुसुरान्दो भावानन्दस्तथैवच ।
देवकरानुभानन्दौपीपाविरमथम्मणाः ॥ ४॥

नाभाटीलोतथाखोजीकूबालालतुरङ्गिणौ ।
मलूकश्चेतनस्वामी योगा नन्दभडङ्गिनौम् ॥ ५॥

श्रीभगवन्नारायणौ रामरङ्गीचतुर्भुजः ।
पूर्णविराठी हनुमान् रामरावल एवच ॥ ६॥

कबीरदेवमुरारी हुँदुरामस्तथैवच ।
माधवोज्ञानिनामाश्च श्रीतनतुलसी तथा ॥ ७॥

राघोचेतनकालुश्च रामरमणिरेवच ।
रामानन्दानुयायिनान्द्वाराः सप्तत्रिंशन्मताः ॥ ८॥

नागाख्यश्शोभुरामश्च वनखण्डीघमण्डीच ।
परशुरामश्चगोविन्दस्त्यागी कर्मचन्दस्तथा ।
आत्मारामाश्च नवमोनिम्बार्कस्यानुयायिनाम् ॥ ९॥

नित्यानन्दः श्यामानन्दः श्रीराधावल्लभस्तथा ॥ १०॥

श्रीमाध्वसम्प्रदायिनान्त्रयोद्वाराः सताम्मताः ॥ ११॥

सुभक्तोनामदेवोवै गोकुलो विठ्ठलस्तथा ।
विष्णुस्वाम्यनुयायिना त्रयोद्वाराः सताम्मताः ॥ १२॥

रामनारायणेनेमेन्द्वारा अयोध्यावासिना ।
चतुर्णांसम्प्रदायिनां वर्णिताहि विभागशः ॥ १३॥

अथसप्त, अखाडा-
अखण्डसंज्ञासङ्केतः कृतोधर्मविवर्द्धये ।
लानन्दप्रभृतिभिः सम्प्रदायानुसारिभिः ॥ १॥

नाहमादिखण्डोयत्र साखण्डौहाहृतः: ।
चतुर्णांसम्प्रदायिनामखण्डा ः सप्तवैमताः ॥ २॥

तत्तदन्तर संज्ञानामर्थश्चैव यथाश्रुतः ।
वर्णयामि वैष्णवानां पाद पद्मप्रणम्यवै ॥ ३॥

दिगम्बर-
केवलंस्वेष्टदेवस्यस्मरणेवर्त्ततेसदा ।
दिशोम्बराणियस्यस्यात्सम्मतस्सदिगम्बरः ॥ ४॥

निर्वाणा -
वानंविषयरूपंयच्छुष्कं फलमुदाहृतम् ।
यस्मात्तु निर्गतं वानं सनिर्वाणस्समीरितः ॥ ५॥

निर्मोही -
स्वस्यहानुवर्तिषु पुत्रवित्तगृहादिषु ।
मोहोहिनिर्गतो यस्मात्स निर्मोहौदाहृतः ॥ ६॥

खाकी -
खम्ब्रह्मण्यास्मरणचकं सुखेचप्रकीर्तितम् ।
ब्रह्मणस्स्मरणेयस्यसुखं खाकीमतोबुधैः ॥ ७॥

निरालम्ब-
देवान्तरेष्ववलम्बायेश्चाल्पसुखसाधनः ।
सनिश्शेषगतो यस्मान्निरालम्बोमतोहिसः ॥ ८॥

सन्तोषी -

स्वारब्धस्यतु संयोगात्स्वल्पेलब्धेऽपि वस्तुनि ।
सन्तोषोविद्यतेयस्य ससन्तोषी सदामतः ॥ ९॥

महानिर्वाण-
निर्वाणं निवृत्तौनाशे मोक्षेचैवप्रकीत्तितम् ।
महन्मोक्षसुखंयस्य समहानिर्वाणोमतः ॥ १०॥

अखाडे में शामिल होने वाले की संज्ञायें-
छोरोबनगिरेर्दारो होडदङ्गस्तृतीयकः ।
मुदाठयश्चनागोवै षष्ठोऽतीतोमतोबुधैः ॥ ११॥

प्रत्यखण्डं च षड्संज्ञाविद्यन्तेद्युत्तरोतराः ।
तत्तत्सेवाविभागेन कृताः पूर्वैर्मुन्दावहाः ॥ १२॥

तथात्र्यब्दान्तन्त्र्यब्दान्तमेकैकातुप्रवर्त्तते ।
पञ्चमीरविवर्षान्ता मताश्रीसुजनैस्सदा ॥ १३॥

अन्तिमायास्तुसंज्ञाया मरणावधिर्मतोबुधैः ।
अस्याम्भजननिष्ठाच हितादिशश्चवर्त्तते ॥ १४॥

छोरा -
स्वपूर्वेषान्तुसेवायै दन्तकाष्ठादिकं तथा ।
छुरतितेन छोरेति संज्ञातस्यप्रकीर्तिता ॥ १५॥

बनगीदार-
सबनगिरिदारोवैरागद्येववनञ्चयः ।
दृणातिप्रभुकैङ्कर्यैः कल्मषस्यगिरिन्तथा ॥ १६॥

हुडदङ्गा-
अन्नापाकादिकैङ्कर्यैर्दुर्जनानामनादरात् ।
पालयत्यात्मानंयस्तु होडदङ्गोमतो बुधैः ॥ १७॥

मुदाठिया-
मुदमाप्नोतिसर्वत्रयतोदेवस्ततोमुदाठू ।
सेवार्थमयतेतं यो मुदाठयमतोहिसः ॥ १८॥

नागा -
नगवदुपकारेयोवर्त्तते महतां सदा ।
सम्यग्वचन चातुर्यैस्तेननागाउदाहृतः ॥ १९॥

अतीत-
पञ्चसंज्ञोक्तकैङ्कर्यमतिक्रम्यस्थितस्तुयः ।
केवलंरामस्मरणेयत्तोऽतीतो मतो बुधैः ॥ २०॥

अखाडमल्ल-
गुरुस्थानम्मया सेव्यमित्यभिमानंसन्त्यजन् ।
अखण्डधरतेयश्चाखण्डमल्लमतोहिसः ॥ २१॥

स्थानधारी-
गुरुस्थानम्मयासेव्यमितिधर्मन्तुह्यत्यजन् ।
गुरुकृपावलम्बीयः सहिस्थान धरोमतः ॥ २२॥

महानिर्वाण सन्तोषौ निर्मोहस्यानुयायिनौ ।
निरालम्बश्चखाकीच निर्वाणस्यानुयायिनौ ॥ २३॥

दिगम्बरश्चमध्यस्थोगमने वर्त्तते सदा ।
निर्वाणश्चाग्रतोगच्छेन्निर्मोहस्तुप्रष्ठतः ॥ २४॥

त्र्यनीकमेवंसम्बन्धं सर्ववैष्णवसम्मतम् ।
वर्णितञ्चमयातत्तु पूर्वेभ्यश्चयथाश्रुतम् ॥ २५॥

रामनारायणेनायं सुज्ञानायसतांसदा ।
अखण्डसंज्ञासिद्धान्तो वर्णितोवैमुदावहः ॥ २६॥

इति द्विपञ्चाशद्वाराचार्याकृता भजनरत्नावली सम्पूर्णा ।

Encoded and proofread by Mrityunjay Pandey

Bhajana Ratnavali

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*